संस्कृतम् (Sanskrit) (209) – आदर्शप्रश्नपत्रम्

**परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs)** **पूर्णाङ्काः (Full Marks) - 100**

**निर्देशाः -**

1) अस्मिन् प्रश्नपत्रे [A] भागे 20, [B] भागे 7, [C] भागे 5, [D] 5, [E] भागे 4 इति आहत्य 41 प्रश्नाः सन्ति।
2) समे प्रश्ना अनिवार्याः। तत्र वैकल्पिकभागेषु एकः एव समाधेयः।
3) प्रत्येकं प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काःxप्रश्नाः=पूर्णाङ्काः) इति अङ्काः दीयन्ते।
4) A भागे प्र.सं. 1 तः 20 पर्यन्तं - बहुविकल्पप्रकारस्य प्रश्नाः (MCQs) येषु प्रत्येकं एकः अंकः भवति। एतेषु प्रत्येकस्मिन् प्रश्ने दत्तचतुर्णां विकल्पानां मध्ये सर्वाधिकं उपयुक्तं विकल्पं चित्वा लिखन्तु। एतेषु केषुचित् प्रश्नेषु आन्तरिकः विकल्पः प्रदत्तः अस्ति। एतादृशेषु प्रश्नेषु दत्तविकल्पेषु एकस्य एव प्रयासः करणीयः।
5) B भागे प्र.सं. 21 तः 27 पर्यन्तम् - वस्तुनिष्ठप्रश्नाः। प्रत्येकं प्रश्नः अंकद्वयात्मकः अस्ति। ते यथानिर्देशं समाधेयाः।
6) C भागे प्र.सं. 28 तः 32 पर्यन्तम् अतिलघूत्तरियाः प्रश्नाः प्रत्येकम् अंकद्वयात्मकाः सन्ति। ते यथानिर्देशं समाधेयाः।
7) D भागे प्र.सं. 33 तः 37 पर्यन्तम् अनतिदीर्घोत्तरीयाः प्रश्नाः प्रत्येकम् चतुरंकात्मकाः सन्ति। ते यथानिर्देशं 50 तः 80 शब्दानां परिधिमध्ये समाधेयाः।
8) E भागे प्र.सं. 38 तः 41 पर्यन्तम् दीर्घोत्तरीयाः प्रश्नाः प्रत्येकम् पञ्च अंकात्मकाः सन्ति। ते यथानिर्देशं 80 तः 100 शब्दानां परिधिमध्ये समाधेयाः।
9) समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।
10) स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूंन लेख्या।
11) उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।
12) समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।
13) निरीक्ष्यताम् यत् प्रश्नपत्रस्य पुटसंख्या प्रश्नानां च संख्या प्रथमपुटस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।
14) अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपुटे नूनं लेख्यः।

| | | |
|---|---|---|
| A | **विंशतिप्रश्नानां** युक्तं विकल्पं चिनुत। 1x20 =20 | |
| 1. | द्वयोः कश्चिदेकः प्रश्नः समाधेयः<br><br>i) जम्बुवृक्षे कः निवसति स्म।<br>(क) रक्तमुखः (ख) करालमुखः (ग) रक्तवदनः (घ) करालवदनः।<br><br>अथवा<br><br>ii) सर्वेन्द्रियाणि कथं कृत्वा बकवत् पण्डितो जनः।<br><br>(क) संयम्य (ख) नियम्य (ग) प्रयम्य (घ) सुयम्य। | 1 |
| 2. | अन्धाः केन ध्यायन्तः जीवन्ति।<br>(क) वाचा (ख) श्रोत्रेण (ग) मनसा (घ) चक्षुषा | 1 |
| 3. | द्वयोः कश्चिदेकः प्रश्नः समाधेयः<br><br>i) वने विसर्जितः अपि कः जीवति।<br>(क) सुरक्षितः (ख) अरक्षितः (ग) राजरक्षितः (घ) दैवरक्षितः<br><br>अथवा<br><br>ii) तुरीयाश्रमसेवी कः।<br>(क) सन्न्यासी (ख) दौवारिकः (ग) राजा (घ) ब्रह्मचारी | 1 |
| 4. | दशपुत्रसमः कः भवति।<br>(क) द्रुमः (ख) वृक्षः (ग) ह्रदः (घ) वापी | 1 |

| | | |
|---|---|---|
| 5. | द्वयोः कश्चिदेकः प्रश्नः समाधेयः<br><br>i) सत्याग्रहाश्रमः कस्या नद्यास्तीरे स्थापितः।<br>(क) सवर्मत्याः (ख) गोदावर्याः (ग) यमुनायाः (घ) गङ्गायाः<br><br>अथवा<br><br>ii) समुत्पन्नेषु कार्येषु ________यस्य न हीयते।<br>(क) प्रज्ञा (ख) बुद्धिः (ग) मतिः (घ) शक्तिः | 1 |
| 6. | सरलहृदयः इति कस्य विशेषणम्।<br>(क) मकरस्य (ख) मकर्याः (ग) वृक्षस्य (घ) वानरस्य | 1 |
| 7. | द्वयोः कश्चिदेकः प्रश्नः समाधेयः<br><br>i) चक्षुषः निर्गमनात् परं केन शरीरात् निर्गतम्।<br>(क) वाचा (ख) श्रोत्रेण (ग) मनसा (घ) प्राणेन<br><br>अथवा<br><br>ii) 'अनागतविधाता च' इति श्लोकः केन विरचिते ग्रन्थे लभ्यते।<br>(क) विष्णुशर्मणा (ख) कालिदासेन (ग) शिवदासेन (घ) वाल्मीकिना | 1 |
| 8. | दौवारिकः अभिज्ञानाय सन्न्यासिनं कं प्रति नेतुम् इयेष।<br>(क) शिववीरं प्रति (ख) गौरसिंहं प्रति (ग) दुर्गाध्यक्षं प्रति (घ) दुर्गाचार्यं प्रति | 1 |
| 9. | द्वयोः कश्चिदेकः प्रश्नः समाधेयः<br><br>i) पादपानां रोपणेन के के लोका लभ्यन्ते।<br>(क) भूमिदानप्राप्ताः (ख) गोदानप्राप्ताः (ग) गोदानयज्ञप्राप्ताः (घ) भूमिगोदानप्राप्ताः<br><br>अथवा<br><br>ii) दशभिः कूपैः सह कस्य तुलना विधीयते।<br>(क) ह्रदस्य (ख) वृक्षस्य (ग) द्रुमस्य (घ) वाप्याः | 1 |

| | | |
|---|---|---|
| 10. | गुरुशब्दस्य द्वितीयाबहुवचने किं रूपम्।<br>(क) गुरवः (ख) गुरून् (ग) गुरुम् (घ) गुरुभिः | 1 |
| 11. | द्वयोः कश्चिदेकः प्रश्नः समाधेयः<br>i) चन्दनविटपः किं करोति।<br>(क) वपुषा सन्तापं हरति (ख) फलेन सन्तापं हरति (ग) सर्वतः सारं गृह्णाति (घ) आपद्गतं रक्षति<br>अथवा<br>ii) वधिराः कथं जीवनं यापयन्ति।<br>(क) वाचा अवदन्तः (ख) चक्षुषा अपश्यन्तः (ग) श्रोत्रेण अशृण्वन्तः (घ) प्राणेन अश्वसन्तः | 1 |
| 12. | मनोवाक्कायकर्मभिः आश्रमे किं प्रमाणम्।<br>(क) धर्मः (ख) मोक्षः (ग) सत्यम् (घ) सदाचारः | 1 |
| 13. | द्वयोः कश्चिदेकः प्रश्नः समाधेयः<br>i) महात्मगान्धिनः उपमानं किम्।<br>(क) बुद्धः (ख) सत्यग्रहाश्रमः (ग) देवः (घ) राजा<br>अथवा<br>ii) काषायं वासः यस्य सः।<br>(क) काषायवासाः (ख) काषायवासः (ग) काषायवसः (घ) काषायवासांसि | 1 |
| 14. | शैलेन्द्रः इत्यत्र कः समासः।<br>(क) पञ्चमीतत्पुरुषः (ख) षष्ठीतत्पुरुषः (ग) द्वितीयातत्पुरुषः (घ) तृतीयातत्पुरुषः | 1 |

| | | |
|---|---|---|
| 15. | द्वयोः कश्चिदेकः प्रश्नः समाधेयः<br><br>i) शशिनम् इत्यत्र किं प्रातिपदिकम्।<br><br>(क) शशिन्  (ख) शशि  (ग) शशी  (घ) शशिण्<br><br>अथवा<br><br>ii) काश्याम् इति कीदृशं रूपम्।<br><br>(क) प्रथमैकवचनान्तम् (ख) षष्ठीबहुवचनान्तम् (ग) सप्तम्येकवचनान्तम् (घ) पञ्चम्येकवचनान्तम् | 1 |
| 16. | पितोच्चतरस्तथा इत्यत्र सन्धिविच्छेदः कः।<br><br>(क) पिता+उच्चतरः+तथा (ख) पिता+उत्+चतरः+तथा (ग) पित+उच्चतरः+ तथा (घ) पिता+उच्चतर+स्तथा | 1 |

| | | |
|---|---|---|
| 17. | द्वयोः कश्चिदेकः प्रश्नः समाधेयः<br><br>i) देव + इन्द्रः इत्यत्र सन्धौ किं रूपम्।<br>(क) देवीन्द्रः  (ख) देवान्द्रः  (ग) देविन्द्रः  (घ) देवेन्द्रः<br><br>अथवा<br><br>ii) हित्वा इत्यत्र कः धातुः कश्च प्रत्ययः।<br>(क) हा + क्त्वा  (ख) हि + क्त्वा  (ग) धि + त्वा  (घ) हन् + क्त्वा | 1 |
| 18. | नास्त्यत्रेशः इत्यत्र सन्धिविच्छेदः।<br>(क) न अस्ति अत्र ईशः (ख) नास्ति अत्र ईशः (ग) न अस्ति अत्र इशः (घ) न अस्त्यत्र इशः | |

| | | |
|---|---|---|
| 19. | द्वयोः कश्चिदेकः प्रश्नः समाधेयः<br><br>i) त्रिभिः + रोगः इत्यत्र सन्धौ किं रूपम्।<br>(क) त्रिभि रोगः (ख) त्रिभी रोगः (ग) त्रिभिरोगः (घ) त्रिभो रोगः<br><br>अथवा<br><br>ii) प्रसादयितुम् इति रूपं कथं निष्पन्नम्।<br>(क) प्र-सद्+णिच्+तुमुन् (ख) प्र-सद्+तुमुन् (ग) प्र-साद्+तुमुन् (घ) प्रसद्+णिच्+तुमुन् | 1 |
| 20. | _________बहिः उद्यानम् अस्ति। -<br><br>(क) ग्रामस्य (ख) ग्रामाद् (ग) ग्रामेन (घ) ग्रामम् | 1 |

| 21. | उचितविकल्पान् मेलयत | 4x1= 4 |
|---|---|---|
| | क स्तम्भः | ख स्तम्भः |
| 1. | i) बहुमत्स्यः | क मकरः |
| | ii) स्वल्पसंतुष्टः | ख ह्रदः |
| | iii) करालमुखः | ग श्वा |
| | iv) श्रेष्ठाः | घ प्रमाणम् |
| | अथवा | |
| 2. | i) विरहकातरं | क गंगा |
| | ii) सत्यमेव | ख पृथिव्याः |
| | iii) पुत्रोsहं | ग प्रणाः |
| | iv) त्रिपथगा | घ तपोवनम् |

| 22. | अधोलिखितेषु वाक्येषु सत्यम् असत्यं वा इति लिखत - 4x4= 4 | |
|---|---|---|
| 1 | i) | सरलहृदयः इति मकरस्य विशेषणम् । |
| | ii) | चंदनवृक्षः वपुषां संतापं हरति । |
| | iii) | गर्दभः शीतोष्णं न विंदति । |
| | iv) | शरीरे प्राणाः सर्वश्रेष्ठाः। |
| | अथवा | |
| 2 | i) | प्रत्युत्पन्नमतिः वृक्षे निवासति स्म । |
| | ii) | संन्यासीवेशे शिवाजी महाराजः एव दुर्गं प्रविशति । |

| | | |
|---|---|---|
| | iii) | पादपाः न जिघ्रन्ति । |
| | iv) | अन्धाः श्रोत्रेण शृण्वंतः जीवन्ति। |

23. उदाहरणानुसारम् अधोलिखितानां शब्दानां विभक्तिवचनसहितं रुपं लिखत। (किमपि चतुष्टयम्) 4(1*4)

| | शब्दः | विभक्तिः वचनम् | रूपम् |
|---|---|---|---|
| उदा. | रामः | चतुर्थी एकवचनम् | रामाय |
| 1 | i) मकरः | पञ्चमी बहुवचनम् | |
| | ii) पुष्प | चतुर्थी द्विवचनम् | |
| | iii) प्राण | षष्ठी एकवचनम् | |
| | iv) भटः | षष्ठि बहुवचनम् | |
| | | अथवा | |
| 2 | i) गृहम् | सप्तमी बहुवचनम् | |
| | ii) जीविका | प्रथमा एकवचनम् | |
| | iii) गुणः | तृतीया द्विवचनम् | |
| | iv) देवः | तृतीया बहुवचनम् | |

| | | |
|---|---|---|
| 24. उचितेन धातुरूपेण वाक्यपूर्तिं कुरुत। (किमपि चतुष्टयम्) | | 4x1= 4 |
| 1 | i) वृक्षे रक्तमुखनामकः वानरः .....................स्म । (वस्- लट्) | |
| | ii) नरः कार्यं कर्तुम् .......................... । (इच्छ- लट्) | |
| | iii) वर्षान्ते प्रत्यागत्य……………………. । (पृच्छ्- लङ् ) | |
| | iv) वयम् अपि ……………………. । (जीव्-लट्) | |
| | अथवा | |
| 2 | i) वयं च संन्यासिनो वनेषु गिरिकंदरेषु च ……। (चर्- लट्) | |
| | ii) जलं……….. रक्षितम्। (रक्ष्- लट्) | |
| | iii) नान्या तेषां तेषां गतिः ……..। (भू- विधिर्लिङ्) | |
| | iv) शक्रः युद्धाय तत्परः………………। (भू- लङ्) | |

25. सन्धिं सन्धिविच्छेदं वा कुरुत, संधेः नामोल्लेखमपि कुरुत। (किमपि चतुष्टयम्)
4x1= 4

| | |
|---|---|
| 1 | i) प्रति + उत्तरति= ............. |
| | ii) प्राण + आदय= ................. |
| | iii) ....... + अनाथो = जीवत्यनाथो |
| | iv) भय + ……. = भयाकुलः |
| | अथवा |
| 2 | i) अद्य + .......... = अद्यावधिः |
| | ii) सत्य + आग्रहः = ............... |
| | iii) घृत + उद्भवाः = ................ |
| | iv … + अवर्तयत् = न्यवर्तयत् |

| 26. | अधोरेखांकितं पदम् अनुसृत्य प्रश्ननिर्माणं कुरुत (कानिचन पंच) 5 (1*5= 5) |
|---|---|
| 1 | प्रणान् आगणयन् जीविकां निर्वहसि| |
| 2 | वाक् शरीरात् निर्गता| |
| 3 | मम हृदयेन एव कार्यम् |
| 4 | वृक्षाः सत्पुरुषा इव । |
| 5 | जीवात्यनाथोऽपि वने विसर्जितः । |
| 6 | बलं सर्वबलेभ्योऽपि सत्यम् एवातीरिच्यते |

| 27. अधोलिखितेषु प्रकृतिप्रत्यय-विभाजनं प्रदर्शयत। (कानिचन पंच) 5 (1*5= 5) | |
|---|---|
| 1 | i) खन् + शतृ = ............. |
| | ii) मा + क्त्वा = ................. |
| | iii) ....... + .............. = खादित्वा |
| | iv) महत् + ……. = महत्व |
| | iv) कृ + तव्यत् = …………………. |
| | अथवा |
| 2 | i) हन् + क्त = ......... |
| | ii) भुज् + क्त्वा = .............. |
| | iii)..............+ ........ = गत्वा |
| | iv)............. + त्व = गुरुत्व |
| | v) आ+ गम् + ल्यप् = ............... |

[B] **पञ्चानां प्रश्नानां यथानिर्देशम् उत्तराणि लिखत।** **2x5=10**

**28**) गोदावरी नदी कीदृशी। नद्याः तटे कस्य महर्षेः आश्रमः विद्यते।

29) वत्से, अलं रुदितेन – इति कस्य वचनम्। शकुन्तलायाः प्रियसखीद्वयस्य नाम किम्।

30) i) युधिष्ठिरनये किं तावत् तपसः लक्षणम्। अकार्यनिवर्तनं कस्य लक्षणम्।

अथवा

ii) प्राणेषु गतेषु किम् अभवत्?

31) गरुडनीडानि वीक्ष्य शक्रः मातलिं किमुवाच। कस्मिन् प्रसङ्गे शक्रमातल्योः अयं वार्तालापः।

32) जृम्भकास्त्रं केन प्रयुक्तम्। सैन्यं किमिव अस्पन्दम् आसीत्।

[C] पञ्च प्रश्नान् अनतिदीर्घोत्तरैः समाधत्त। 4x5=20

33) 'विरहकातरं तपोवनम्' इत्यत्र मूलग्रन्थस्य ग्रन्थकृतश्च समासेन परिचयं वर्णयत।

34) 'अयोध्याप्रत्यागमनम्' इति पाठस्य सारं वाक्याष्टकेन लिखत।

35) i) यक्षयुधिष्ठिरसंवादे 'किन्नु हित्वा प्रियो भवति' इत्यादिप्रश्नश्लोकस्य युधिष्ठिरप्रदत्तमुत्तरं वर्णयत।

36) दैत्यैः सह बोधिसत्त्वात्मकस्य इन्द्रस्य युद्धं यथाग्रन्थं वर्णयत।

37) 'अत्यद्भूतादसि गुणातिशयात्प्रियो मे' इति 'एष साङ्ग्रामिको न्याह' इति वा एकं श्लोकं प्रपूर्य स्वभाषया भावार्थं लिखत।

अथवा

ii) स्वपाठ्यपुस्तकात् स्मृतं किंचित् श्लोकद्वयं लिखत ।

[D] 38) अधोलोखितं गद्यशं पठित्वा प्रश्नानाम् उत्तराणि लिखत । 5

प्राचीनभारते मगधजनपदे नन्दवंशस्य साम्राज्यम् आसीत्। तस्मिन् राज्ये बुद्धिमन्तः मन्त्रिणः कर्तव्यनिष्ठाः कर्मचारिणः च राज्ञः साहाय्यं कुर्वन्ति स्म। मगधसाम्राज्यस्य सभायां गुणवन्तः

चिन्तनशीलाः ज्ञानिनश्च पण्डिता आसन्। ते विद्वांसः समदर्शिनः आसन्। अतः न्यायव्यवस्था अतीव समीचीना आसीत्। तस्मिन् राज्ये शक्तिमन्तः सैनिकाः दीर्घकायाः वीराश्च आसन्। तैः तत्र अश्वशालायां श्वेतेभ्यः कृष्णेभ्यः रक्तेभ्यः विचित्रवर्णेभ्यः च बलिष्ठेभ्यः अश्वेभ्यः युद्धप्रशिक्षणं दीयते स्म। नगरस्य वैभवमपि उत्कृष्टमासीत्। तत्र उन्नतं दीर्घं च भवनं, सुन्दरं सुरम्यं मनोहरं च उद्यानं, विशालः तडागः सुदीर्घः राजमार्गः च नगरस्य शोभां वर्धयन्ति स्म।

(क) नन्दवंशस्य साम्राज्यं कुत्र आसीत्?

(ख) राज्ञः मन्त्रिणः कीदृशा आसन्?

(ग) नगरस्य शोभा कीदृशी आसीत्?

(घ) तत्र सैनिकाः कीदृशाः?

(ङ) सैनिकाः केभ्यः युद्धप्रशिक्षणं यच्छन्ति स्म?

39) एकम् विषयम् अधिकृत्य मञ्जूषासाहाय्येन दशसु वाक्येषु एकम् अनुच्छेदं लिखत। 5

'सज्जनसङ्गतिः' - **मञ्जूषा -** सतां सङ्गमः, बुद्धिजडताम्, हरति, सत्यवचनम्, शिक्षयति, सम्माननम्, प्रयच्छति, कीर्तिम्, विस्तारयति, चित्तस्य निर्मलताम्, करोति।

अथवा

'मम देशः भारतम्'- **मञ्जूषा -** जन्मभूमिः, प्राचीना संस्कृतिः, हिमालयः सागराः, वेदज्ञानम्, योगः, साहित्यम्, रामायणम्, महाभारतम्, विविधाता, भाषाः, प्रदेशाः

40) भवान् रामः छात्रावासे निवसति। भवतः भगिन्या जन्मदिवसम् उपलक्ष्य परीक्षाकारणात् गन्तुम् असमर्थः। अतः पत्रालयद्वारा उपहाररूपेण वस्त्रं प्रेषयति। इत्थं स्वभगिनीं शान्तां प्रति पत्रं लिखतु। 5

अथवा

पुस्तकक्रयणार्थं प्रकाशकं प्रति एकं पत्रं लिखतु ।

41) अधोलिखितं चित्रं दृष्ट्वा मञ्जूषासाहाय्येन दश वाक्यानि लिखत। 5



**मञ्जूषा** - देहल्यां विश्वपुस्तकप्रदर्शनी, तत्र बहवः जनाः, बहुभ्यः देशेभ्यः, अहं पिता माता भ्राता च, संस्कृतपुस्तकस्य, क्रयणाय, हिन्दीपुस्तकस्य च, श्रीमद्भागवतम्, कुमारसम्भवम्, रामायणम्, प्रदर्शनीदर्शनेन आनन्दितः।

--) (O) (--

संस्कृतम् (Sanskrit) (209) MS

Code No. गूढसंख्या

परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs)     पूर्णाङ्काः (Full Marks) - 100

| | | |
|---|---|---|
| A | **विंशतिप्रश्नानां** युक्तं विकल्पं चिनुत।     1x20 =20 | |
| 1. | i) (क) रक्तमुखः अथवा ii) (क) संयम्य | 1 |
| 2. | (ग) मनसा | 1 |
| 3. | i) (घ) दैवरक्षितः अथवा ii) (क) सन्न्यासी | 1 |
| 4. | (क) द्रुमः | 1 |
| 5. | i) (क) सवर्मत्याः अथवा ii) (ख) बुद्धिः | 1 |
| 6. | (घ) वानरस्य | 1 |
| 7. | i) (ख) श्रोत्रेण अथवा ii) (क) विष्णुशर्मणा | 1 |
| 8. | (ग) दुर्गाध्यक्षं प्रति | 1 |
| 9. | i) (घ) भूमिगोदानप्राप्ताः अथवा ii) (घ) वाप्याः | 1 |
| 10. | (ख) गुरून् | 1 |
| 11. | i) (क) वपुषा सन्तापं हरति अथवा ii) (ग) श्रोत्रेण अशृण्वन्तः | 1 |
| 12. | (ग) सत्यम् | 1 |

| | | |
|---|---|---|
| 13. | i) (क) बुद्धः अथवा ii) (क) काषायवासाः | 1 |
| 14. | (ख) षष्ठीतत्पुरुषः | 1 |
| 15. | i) (क) शशिन् अथवा ii) (ग) सप्तम्येकवचनान्तम् | 1 |
| 16. | (क) पिता+उच्चतरः+तथा | 1 |

| | | |
|---|---|---|
| 17. | i) (घ) देवेन्द्रः अथवा ii) (क) हा + क्त्वा | 1 |
| 18. | (क) न अस्ति अत्र ईशः | |
| 19. | i) (ख) त्रिभी रोगः अथवा ii) (क) प्र-सद्+णिच्+तुमुन् | 1 |
| 20. | (ख) ग्रामाद् | 1 |

| 21. | उचितविकल्पान् मेलयत | 4x1= 4 |
|---|---|---|
| | क स्तम्भः | ख स्तम्भः |
| 1. | i) बहुमत्स्यः | ख ह्रदः |
| | ii) स्वल्पसंतुष्टः | ग श्वा |
| | iii) करालमुखः | क मकरः |
| | iv) श्रेष्ठाः | घ प्रमाणम् |
| | अथवा | |
| 2. | i) विरहकातरं | घ तपोवनम् |
| | ii) सत्यमेव | ग प्रणाः |

| | | |
|---|---|---|
| | iii) पुत्रोऽहं | ख पृथिव्याः |
| | iv) त्रिपथगा | क गंगा |

| | | |
|---|---|---|
| 22. | अधोलिखितेषु वाक्येषु सत्यम् असत्यं वा इति लिखत - 4x4= 4 | |
| 1 | i) | असत्यं |
| | ii) | सत्यं |
| | iii) | सत्यं |
| | iv) | सत्यं |
| | अथवा | |
| 2 | i) | असत्यं |
| | ii) | सत्यं |
| | iii) | असत्यं |
| | iv) | सत्यं |

| | |
|---|---|
| 23. | उदाहरणानुसारम् अधोलिखितानां शब्दानां विभक्तिवचनसहितं रुपं लिखत। (किमपि चतुष्टयम्) 4(1*4) |
| उदा. | रामाय |
| 1 | I. मकरात् |
| | II. पुष्पाभ्याम् |

| | |
|---|---|
| | III. प्राणस्य |
| | IV. भटानाम् |
| 2 | I. गृहेषु |
| | II. जीविका |
| | III. गुणाभ्याम् |
| | IV. देवैः |

| 24. उचितेन धातुरूपेण वाक्यपूर्तिं कुरुत। (किमपि चतुष्टयम्) | | 4x1= 4 |
|---|---|---|
| 1 | i) वसति | |
| | ii) इच्छति | |
| | iii) अपृच्छत् | |
| | iv) जीवामः | |
| | अथवा | |
| 2 | i) चरामः | |
| | ii) रक्षति | |
| | iii) भवेत् | |
| | iv) अभवत् | |

| | |
|---|---|
| 25. सन्धिं सन्धिविच्छेदं वा कुरुत, संधेः नामोल्लेखमपि कुरुत। (किमपि चतुष्टयम्) | 4x1= |

| 4 | |
|---|---|
| 1 | i) प्रत्युत्तरति |
| | ii) प्राणादय |
| | iii) जीवति |
| | iv) आकुलः |
| | अथवा |
| 2 | i) अवधिः |
| | ii) सत्याग्रहः |
| | iii) घृतोद्भवाः |
| | iv नि |

| 26. | अधोरेखांकितं पदम् अनुसृत्य प्रश्ननिर्माणं कुरुत (कानिचन पंच) 5 (1*5= 5) |
|---|---|
| 1 | कान् आगणयन् जीविकां निर्वहसि? |
| 2 | वाक् कस्मात् निर्गता? |
| 3 | कस्य हृदयेन एव कार्यम् ? |
| 4 | के सत्पुरुषा इव? |
| 5 | जीवात्यनाथोऽपि कुत्र/कस्मिन् विसर्जितः? |
| 6 | बलं सर्वबलेभ्योऽपि किम् एवातीरिच्यते? |

| 27. अधोलिखितेषु प्रकृतिप्रत्यय-विभाजनं प्रदर्शयत। (कानिचन पंच) 5 (1*5= 5) | |
|---|---|
| 1 | i) खनन् |
| | ii) मत्वा |
| | iii) खाद् + क्त्वा |
| | iv) त्व |
| | iv) कर्तव्यम् |
| | अथवा |
| 2 | i) हतः |
| | ii) भुक्त्वा |
| | iii) गम् + क्त्वा |
| | iv) गुरु |
| | v) आगत्य |

[B] **पञ्चानां प्रश्नानां यथानिर्देशम् उत्तराणि लिखत।** 2x5=10

28) गोदावरी नदी स्वच्छसलिला रम्या शुभा च विद्यते। तस्या नद्याः तटे महर्षेः अगस्त्यस्य आश्रमः विद्यते।

29) वत्से, अलं रुदितेन – इति कण्वस्य वचनम्। शकुन्तलायाः प्रियसखीद्वयं तावद् अनसूया प्रियंवदा च।

30) i) युद्धिष्ठिरनये तपसः लक्षणं तावत्स्वधर्मवर्तित्वम्। अर्थात् यथायथं स्वकर्तव्यपालनम्। अकार्यनिवर्तनं ह्रियः लक्षणम्।

अथवा

ii) प्राणेषु गतेषु किम् अभवत्?

31) गरुडनीडानि वीक्ष्य शक्रः मातलिम् उवाच यत् अजातपक्षपक्षिशावकै ः युक्ताः खगालयाः रथवेगेन विपर्यस्ताः न स्युः इति। देवासुरसङ्ग्रामकाले शक्रमातल्योः अयं वार्तालापः।

32) जृम्भकास्त्रं लवेन प्रयुक्तम्। सैन्यं चित्रलिखितम् इव अस्पन्दम् आसीत्।

पञ्च प्रश्नान् अनतिदीर्घोत्तरैः समाधत्त। 4x5=20

33) क) 'विरहकातरं तपोवनम्' इत्यत्र मूलग्रन्थः भवति अभिज्ञानशकु न्तलाख्यं नाटकम्। इदं नाटकं हि महाभारतम् आश्रित्य प्रवर्तते। सप्ताङ्कात्मकम् इदं नाटकम्। अत्र धीरोदात्तः राजर्षिः दुष्यन्तः नायकः नायिका च कण्वमुनिपालिता शकु न्तला। संस्कृ तवाङ्मये नाटकम् इदम् अतीव प्रसिद्धम्। अत उच्यते एका भणितिः - काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला इति।

ख) अस्य नाटकस्य लेखकः हि महाकविः कालिदासः। अस्य समयः हि ख्रिष्टपूर्वप्रथमशतकात् ख्रिष्टीयचतुर्थ-शतकाभ्यन्तरे एव। संस्कृ तसाहित्ये अयं हि अद्वितीयः उपमालङ्कारप्रणयने निष्णातः। अनेन रघुवंशं कुमारसम्भवं चेति महाकाव्यद्वयम्, मेघदूतम् ऋतुसंहारं चेति खण्डकाव्यद्वयम्, अभिज्ञानशकुन्तलं मालविकाग्निमित्रं विक्रमोर्वशीयञ्चेति नाटकत्रयं विरचितम्। तत्र अभिज्ञान-शकुन्तलस्य चतुर्थाङ्कस्य हि संक्षिप्तसारभूतः 'विरहकातरं तपोवनम्' इति पाठ्यांशः।

34) क) ऋष्यमूकपर्वतदर्शनम्।

ख) ततः पम्पासरोवरवर्णनम्।

ग) ततः जटायुस्थानं दृष्ट्वागोदावरीतीरवर्णनम्।

घ) चित्रकू टवर्णनम्।

ङ) गङ्गायमुनासरयूदर्शनाद् परम् अयोध्या।

35) क) यक्षयुद्धिष्ठिरसंवादे 'किन्नु हित्वा प्रियो भवति' इत्यादिप्रश्नश्लोकस्य युद्धिष्ठिरेण उत्तरं प्रदत्तं मानं हित्वा इत्यादिकम्।

ख) अभिमानं त्यक्त्वा मनुष्यः सर्वेषां प्रियः।

ग) क्रोधेन विवेकः नश्यते, अतः क्रोधं त्यक्त्वा मनुष्यः शोकमुक्तः भवति।

36) क) दैत्यैः सह बोद्धिसत्त्वात्मकस्य इन्द्रस्य युद्धं `करुणापरा हि साधवः' इति पाठे वर्णितम्।

ख) इद्रत्वप्रातिः।

ग) राजलक्ष्मीशोभा।

घ) दैत्या ईर्ष्यालवः

ङ) युद्धवर्णनम्

37) i) क) 'अत्यद्भूतादसि गुणातिशयात्प्रियो मे' इति श्लोकः सम्पूर्णः।

ख) प्रसङ्गः। ग) सान्वयार्थः। घ) भावार्थः।

अथवा

क) 'एष साङ्ग्रामिको न्याह' इति श्लोकः सम्पूर्णः।

ख) प्रसङ्गः। ग) सान्वयार्थः। घ) भावार्थः।

अथवा

ii) किंचित् श्लोकद्वयम्।

38) अधोलोखितं गद्यशं पठित्वा प्रश्नानाम् उत्तराणि लिखत । 1x5=5

(क) नन्दवंशस्य साम्राज्यं प्राचीनभारतेमगधजनपदे आसीत्।

(ख) राज्ञः मन्त्रिणः बुद्धिमन्तः मन्त्रिणः कर्तव्यनिष्ठाः आसन्।

(ग) नगरस्य अत्युन्नतवैभवं दीर्घभवनोपेतं सुन्दरसुरम्योद्यानयुतं विशालतडागराजमार्गाद्युपेतम् आसीत्।

(घ) तत्र दीर्घकायाः वीराः शक्तिमन्तः सैनिकाः आसन्।

(ङ) सैनिकाः श्वेतेभ्यः कृष्णेभ्यः रक्तेभ्यश्चअश्वेभ्यं युद्धप्रशिक्षणं यच्छन्ति स्म।

39) एकम् विषयम् अधिकृत्य मञ्जूषासाहाय्येन दशसु वाक्येषु एकम् अनुच्छेदं लिखत। 5

'मनुष्यः समाजे एकाकी स्थातुं न शक्नोति। नानाप्रयोजनसाBनाय विभिन्नानां जनानां संसर्गं लभते सः। यैः सह प्रतिदिनं संसर्गो भवति तेषां स्वभावप्रभावः मानवस्य चरितेषु सर्वदा लक्ष्यते। अतः समीचीनजीवननिर्वाहाय सज्जनसङ्गतिः कार्या। सज्जनसङ्गतिः नाम सतां सङ्गमः। सज्जनसङ्गतेः नैके गुणा वर्तन्ते। इयं बुद्धिजडतां

हरति। सत्सङ्गतिः सत्यवचनं शिक्षयति सम्माननं प्रयच्छति च। इयं हि मनुष्यस्य कीर्तिं सर्वत्र विस्तारयति। चित्तस्य कलुषताम् अपाकृत्य चित्तस्य निर्मलताम् इयं करोति। तेन मानवजीवनम् अतीव हृद्यं रम्यं च भवति।

अथवा

भारतवर्ष : अस्माकं देशः अस्ति । अस्य भूमि: विविधरत्नानां जननी अस्ति । अस्य प्राकृतिकी शोभा अनुपमा अस्ति। हिमालयः अस्य प्रहरी अस्ति। एषः उत्तरे मुकुटमणिः इव शोभते । सागरः अस्य चरणौ प्रक्षालयति अनेकाः पवित्रतमाः नद्यः अत्र वहन्ति । गङ्गा, गोदावरी, सरस्वती, यमुनाः प्रभृतयः नद्यः अस्य शोभां वर्द्धयन्ति। अयं देशः सर्वासां विद्यानां केन्द्रम् अस्ति । अयं अनेकप्रदेशेषु विभक्तः । अत्र विविध धर्मावलम्बिनः सम्प्रदायिनः जनाः निवसन्ति अस्य संस्कृतिः धर्मपरम्परा च श्रेष्ठा अस्ति । अयं भू-स्वर्गः अपि वर्तते। ईश्वरस्य अवताराः अस्मिन् देशे सज्जाताः सङ्कटकाले वयं क्षुद्रभेदान् परित्यज्य देशहितं चिन्तयामः । विशालं भूमण्डलं व्याप्य अयं देशः एशियामहाद्वीपस्य अन्यतमः राष्ट्रः सञ्जातः वयं सदा स्वराष्ट्रस्य रक्षां कर्तुम् उद्यताः स्यामः । कथितमस्ति - "जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।

40) स्वपत्रसङ्केतः, सम्बोधनम्, अभिवादनम्, कुशलसमाचारः, विषयवस्तु, समापनम्, सम्बन्ध, पत्रलेखकस्य नाम। 5

अथवा

सम्बोधनम्, अभिवादनम्, विषयवस्तु, समापनम्, पत्रलेखकस्य नाम, स्वपत्रसङ्केतः।

41) अधोलिखितं चित्रं दृष्ट्वा मञ्जूषासाहाय्येन दश वाक्यानि लिखत। 5

देहल्यां केन्द्रीयसर्वकारस्य उद्योगेन जानवरी-मासे विश्वपुस्तकप्रदर्शनी आयोजिता। तत्र विभिन्नेभ्यः देशेभ्यः विभिन्नाः जनाः समागताः। देशस्य विभिन्नेभ्यः प्रान्तेभ्यः अपि बहवः तत्र आगच्छन्। अहं सपरिवारः विश्वपुस्तकप्रदर्शनीं द्रष्टुम् अगच्छम्। अहं पित्रा मात्रा च सह तत्र अगच्छम्। मम अनुजः अपि तत्र गतवान्। तत्र बहून् विषयान् आश्रित्य बहूनां ग्रन्थानां समूहः दृष्टः। प्रतिविषयं भिन्नं भिन्नम् आपणम्। अहं संस्कृतस्य छात्रः अतः संस्कृतपुस्तकस्य क्रयणाय संस्कृतापणम् आदौ गतवान्। तत्र अहं रामायाणं कु मारसम्भवं च क्रीतवान्। मम माता श्रीमद्भागवतं क्रीतवती। मम पिता हिन्दीपुस्तकस्य क्रयणम् अकरोत्। अहम् प्रदर्शनीदर्शनेन अतीव आनन्दितः। इत्यादिकम्

--) (O) (--